संस्कृत वार्ता:

दिनाङ्क : 08/11/2026 सायम् : 06:20

आदौ मुख्यवार्ता:

- अद्य तावत् देश-विदेशेषु दीपावली-पर्व महोल्लासेन आचर्यते, छत्तीसगढस्य बस्तर-मण्डले सुरक्षा-सैनिकैः सह प्रधानमन्त्रिणा नरेन्द्र-मोदिना आचरितः दीपोत्सवः, अवसरेऽस्मिन् देशस्य सर्वे जनपदाः नक्सल-प्रभावात् मुक्ताः इत्यपि न्यगादीत् असौ ।
- रक्षामन्त्रिणा राजनाथ-सिंहेन सिक्किम-राज्ये सेना-सैनिकैः सह दीपावली-पर्व आचरितम्, अभिनन्दितश्च सुरक्षा-बलानां शौर्यं ।
- इस्रायेल-देशे विपक्षी-याशर-दलस्य नेता गादी-आइज़ेनकोट अरब-दलानां समर्थनेन संयुक्त-सर्वकारं रचयितुं सज्जो वर्तते।
- भारतस्य वैष्णवी-अडकर-ऋतुजा-भोसले इत्यनयोः युगलं अद्य सायं महिला-युगल-ओपन-टेनिस-स्पर्धायां स्विट्ज़र्लैण्ड्-देशस्य नाइमा-करामोको सिमोना-वाल्टर्ट्-युगलेन सह स्पर्धिष्यते ।
- ओमानदेशे अण्डर 19 -एशिया-चषक-स्पर्धायां भारत-पाकिस्तान-दलयोः मध्ये प्रतिस्पर्धायां पाकिस्तानेन विजयम् अधिगतम् ।

दीपावलीपर्व्व

प्रकाशस्य पर्व्व दीपावली अद्य देश-विदेशेषु महत्या धार्मिक-श्रद्धया उल्लासेन च आचर्यते। असत्यस्य चोपरि सत्यस्य विजय-प्रतीकात्मकं इदं पर्व दीप-प्रज्वालनेन गृहालङ्करणेन च सह सोत्साहम् आचर्यते। अस्मिन् पावनावसरे जनाः महालक्ष्म्याः भगवतः गणेशस्य च विधिवत् पूजनं कुर्वन्ति, अथ च सुख-समृद्धि-धन-धान्यानां कामनामपि कुर्वन्ति। राष्ट्रपतिः द्रौपदी-मुर्मूः, उप-राष्ट्रपतिः सी.पी.राधाकृष्णन्, प्रधानमन्त्री नरेन्द्र-मोदी च देशे विदेशेषु च स्थितेभ्यः समेभ्यः भारतीयेभ्यः दीपावल्याः शुभाशंसाः प्राकल्पयन् । स्वकीय-सन्देशे राष्ट्रपतिः द्रौपदी-मुर्मूः अवोचत् यत् एतत् पर्व नकारात्मक-प्रवृत्तीनाम् उपरि सद्गुणानां विजयं सूचयति, अथ च दुःखानां समाप्तिं कृत्वा आनन्दमयस्य समृद्धस्य च जीवनस्य आरम्भं करोति। अपरस्मिन् सन्देशे उपराष्ट्रपतिः राधाकृष्णन् आशां प्राकटयत् यत् इयं दीपावली प्रत्येकस्मिन् गृहे सुखं, शान्तिं, समृद्धिं च आनयेत्, परस्पर-ऐक्यस्य सौहार्दस्य च सम्बन्धं सुदृढं कुर्यादिति

पीएम-दीवालीबस्तरः

प्रधानमन्त्री नरेन्द्र-मोदी अद्य छत्तीसगढ-राज्यस्य बस्तरमण्डले वीर-सुरक्षा-सैनिकैः सह दीपावली-पर्व्व महता उल्लासेन समाचरत्। प्रधानमन्त्री बस्तरस्य करणपुर-स्थितं केन्द्रीय-

आरक्षित-आरक्षि-बलस्य सुरक्षा-शिबिरं अवलोकितवान्। तत्र सैन्य-कर्मचारिणः सम्बोधयन् श्रीमोदी अवोचत् यत् देशस्य इतिहासे प्रथमवारं देशस्य प्रत्येकं जनपदः नक्सल-प्रभावात् मुक्तम् अभवत्, अधुना च कोटिशः नागरिकाः वामपन्थी-उग्रवादस्य भयात् विमुक्ताः सन्ति।

प्रधानमन्त्री अवोचत् यत् देशस्य ऐक्यस्य अखण्डतायाश्च रक्षणाय सुरक्षा-सैनिकैः असंख्याकानि बलिदानानि प्रदत्तानि । सः महिलासहितेभ्यः विशिष्ट-सुरक्षाबलेभ्यः तेषाम् अमूल्य-राष्ट्र-सेवायै कार्त्तज्ञं प्राकटयत्।

प्रधानमन्त्री अपि च अवोचत् यत् यदा देशः राष्ट्रं सर्वोपरि इति भावनया कार्यं करोति, तदा देशे शान्तिः सुरक्षा च सुनिश्चिता भवति, राष्ट्रं च विकासस्य नूतनान् उत्कर्षान् अधिरोहति।

राजनाथ

रक्षामन्त्री राजनाथ सिंहः अद्य सिक्किम-राज्यस्य शेरथाङ्ग-युद्ध-स्मारके सैन्यबलैः सह दीपोत्सवम् प्रहर्षेण आचरितवान्। तत्र असौ सभां सम्बोधयन् न्यगादीत् यत् यदि देशवासिनः निर्विघ्नं शान्तिपूर्वकं च दीपोत्सवम् आचरन्ति, तर्हि अस्य सम्पूर्णः श्रेयः अस्माकं वीर-सैनिकेभ्य एव समुपगच्छति।

मन्त्रिणा कथितं यत् एतानि युद्ध-स्मारकानि देशस्य यूनां हृदये देशभक्त्याः भावनाम् अवश्यं सञ्चारयिष्यन्ति। सः इदम् अपि न्यगादीत् यत् शेरथाङ्ग-स्मारकं राष्ट्राय प्राणान् अर्पयद्भ्यः हुतात्मभ्यः अमर-वीरेभ्यः च भावपूर्णं श्रद्धांजलि-समर्पणम् अस्ति। अस्याम् यात्रायाम् सेनाध्यक्षः धीरज सेठः अन्ये च वरिष्ठ-सैन्याधिकारिणः तेन सह समुपस्थिताः आसन्।

इस्राइल - नूतनसर्वकारः

इस्राइल-देशस्य भूतपूर्वः सेनाध्यक्षः, 'यषार्' दलस्य नेता च गादी आइज़नकोट् महोदयः आगामी-मन्त्रिमण्डलस्य रचनायै राष्ट्रपतिना इसहाक् हेर्ज़ोग् इत्यमुना आधिकारिकं जनाधिकारं प्राप्तवान्। अनेन ऐतिहासिकेन निर्णयेन सः प्रधानमन्त्रिणः बेन्जामिन् नेतन्याहू इत्यस्य स्थानं ग्रहीतुं समर्थो संवृत्तः। राष्ट्रपतिना हेर्ज़ोग् महोदयेन विभिन्न-राजनैतिक-दलैः सह परामर्शं कृत्वा इयम् अधिकृता घोषणा विहिता।

विंशत्युत्तरैकशत-सदस्यीयायां 'नेसेट्' इति इस्राइली-संसदि आइज़नकोट् महोदयाय अरब्-दलानां नवदश सदस्यानां समावेशेन आहत्य सप्तषष्टिः सांसदानां समर्थनं लब्धम्, अपरत्र तावत् नेतन्याहू-महोदयस्य पक्षे केवलं षट्चत्वारिंशत् सांसदाः एव स्थिताः। सप्त सांसदाः तु कस्यापि पक्षे समर्थनं दातुं नैच्छन्। 'यषार्' दलस्य नेता आइज़नकोट् महोदयः समवायि-सर्वकारस्य संरचनायै अष्टाविंशति-दिनात्मकं कालावधिं लप्स्यते, यत्र आवश्यकतानुसारं चतुर्दश-दिनानां अतिरिक्त-समय-विस्तारः अपि सम्भाव्यते।

टेनिस

अद्य सायं चेन्नई-नगरस्य एसडीएटी-क्रीडांगणे-प्रचलन्त्यां महिला-युगल-टेनिस-स्पर्धायाम् भारतस्य वैष्णवी अडकरः- ऋतुजा भोसले च स्विट्जरलैण्ड-देशस्य नैमा करामोको-सिमोना वाल्टरट-विरुद्धं क्रीडित्वा नूतनेतिहासस्य रचनायै सन्नद्धे वर्तेते। डब्लूटीए युगल-स्पर्धायाः अन्तिम-चरणं प्राप्तं इदं प्रथमं भारतीयदलम् अस्ति। एताभ्यां वेरोनिका फाल्कोव्स्का-अलाना स्मिथ-युगलं पराजित्य चरमसोपाने स्थानम् अवाप्तम्।

क्रिकेट

ओमान-देशे समायोजितायां 'एसीसी' अण्डर 19 -एशिया-चषक-स्पर्धायां भारतेन पाकिस्तान-दलस्य समक्षं नवाधिकद्विशतधावनाङ्कानां विजय-लक्ष्यं विहितम्। यत्र पाकिस्तानेन त्रिस्तोभैः विजयम् अधिगतम्